पञ्चम पाठः

# वाक्यबोधः (चतुर्थः)

BZ3D3Y

त्वं कः ? 

अहं दिनेशः।

त्वं किं करोषि ?

अहं गीतं गायामि।

युवां कौ ? 

आवां ऋषभः, जयः।

युवां किं कुरुथः ?

आवां फलं खादावः।



यूयंके ?

वयं दीपेशः, देवेशः, लोकेशः।

यूयं किं कुरुथ ?

वयं गुरुं नमामः।

त्वं कः ?



अहं उजमा।

त्वं किं करोषि ?

अहं संस्कृतं पठामि।

युवां के ?



आवां शिखा, विभा।

युवां किं कुरुथः?

आवां चित्रं रचयावः।

यूयं काः ?



वयं श्रेया, नेहाः, मोनिकाः।

यूयं किं कुरुथ ?

वयं कन्दुकं क्रीडामः।

शब्दार्थाः-

**अहम्** - मैं, **आवाम्** - हम दोनों, **वयम्** - हम सब, **त्वम्** - तुम, **युवाम्** - तुम दोनों, **यूयम्**-तुम सब, **गायामि**-गाता हूँ, **क्रीडामः**-हम सब खेलती हैं, **नमामः**-हम सब प्रणाम करते हैं **रचयावः-** हम दोनों बनाते हैं,**कन्दुकम्** - गेंद ।

अभ्यासाः

**1. मौखिकम् अभ्यासं कुरुत अभ्यासपुस्तिकायां च लिखत -**

अहम् आवाम् वयम् गायामि गायावः गायामः

त्वम् युवाम् यूयम् करोषि कुरुथः कुरुथ

**2. शब्दानुसारं क्रियापदानि चित्वा लिखत -**

(पठामि, क्रीडसि, खादामः नृत्यसि, पचथः, गच्छामि, गच्छथ, हसामः क्रीडावः, कुरुथ, पिबावः,क्रीडथः)

यथा- अहं आवाम् वयम् त्वम् युवाम्, यूयम्

पठामि ........... ........... ........... ........... ...........

........... ........... ........... ........... ........... ...........

**3. वाक्यानि पूरयत -**

यथा- अहं पाठं पठामि। (पठामि/क्रीडामः)

(ख) त्वं किं ........................................। (करोषि/करोमि)

(ग) अहं बालिका ..................................। (असि/अस्मि)

(घ) आवां चित्रं .....................................। (रचयावः/लिखामः)

(ड.) वयं कन्दुकेन .................................। (क्रीडामः/नयावः)

**4. शब्दरूपाणि पूरयत-**

(क) अहम् ................... वयम् (ख) ............... युवाम् यूयम्

(ग) अस्ति ....................सन्ति (घ) असि ................ स्थ

**5. मेलयत -**

अहम् किं करोषि ?

त्वम् दुग्धं पिबामि।

वयम् चित्रं पश्यथ।

यूयम् संस्कृतं लिखामः।

शिक्षण-सकेतः -

शिक्षकः कक्षायाम् 'अस्मद्' 'युष्मद्' शब्दरूपाणां प्रयोगं कारयेत्।